# ॥ ईशावास्योपनिषत्प्रारंभः ॥



श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ हरिःॐ ॥ ईशावास्यमिदꣳस
र्वंयत्किंचजगत्यांजगत् । तेनत्यक्तेनभुञ्जीथामागृधःकस्यस्विद्धनं ॥ १ ॥ कुर्वन्नेवेहकर्माणिजिजीविषेच्छ
तꣳसमाः । एवंत्वयिनान्यथेतोस्तिनकर्मलिप्यतेनरे ॥ २ ॥ असुर्यानामतेलोकाअंधेनतमसावृताः । ताꣳ
स्तेप्रेत्याभिगच्छंतियेकेचात्महनोजनाः ॥ ३ ॥ अनेजदेकंमनसोजवीयोनैनद्देवाआप्नुवन्पूर्वमर्षत् । तद्धाव
तोऽन्यानत्येतितिष्ठत्तस्मिन्नपोमातरिश्वादधाति ॥ ४ ॥ तदेजतितन्नैजतितद्दूरेतद्वंतिके । तदंतरस्यसर्वस्य
तदुसर्वस्यबाह्यतः ॥ ५ ॥ यस्तुसर्वाणिभूतान्यात्मन्येवानुपश्यति । सर्वभूतेषुचात्मानंततोनविजुगुप्सते
॥ ६ ॥ यस्मिन्त्सर्वाणिभूतान्यात्मैवाभूद्विजानतः । तत्रकोमोहःकश्शोकएकत्वमनुपश्यतः ॥ ७ ॥ सपर्यगा
च्छुक्रमकायमव्रणमस्नाविरꣳशुद्धमपापविद्धं । कविर्मनीषीपरिभूस्स्वयंभूर्याथातथ्यतोर्थान्व्यदधाच्छाश्वती
भ्यस्समाभ्यः ॥ ८ ॥ अंधंतमःप्रविशंतियेऽविद्यामुपासते । ततोभूयइवतेतमोयउविद्यायाꣳरताः ॥ ९ ॥
अन्यदेवाहुर्विद्ययाअन्यदाहुरविद्यया । इतिशुश्रुमधीराणांयेनस्तद्विचचक्षिरे ॥ १० ॥ विद्यांचाविद्यांचय
स्तद्वेदोभयꣳसह । अविद्ययामृत्युंतीर्त्वाविद्ययाऽमृतमश्नुते ॥११॥ अंधंतमःप्रविशंतियेऽसंभूतिमुपासते ।

ततोभूयइववेतेतमोयउसंभूत्याꣳरताः ॥१२॥ अन्यदेवाहुस्संभवादन्यदाहुरसंभवात् । इतिशुश्रुमधीराणांये
नस्तद्विचचक्षिरे ॥ १३ ॥ संभूतिंचविनाशंचयस्तद्वेदोभयꣳसह । विनाशेनमृत्युंतीर्त्वासंभूत्याऽमृतमश्नुते
॥ १४ ॥ हिरण्मयेनपात्रेणसत्यस्यापिहितंमुखं । तत्त्वंपूषन्नपावृणुसत्यधर्मायदृष्टये ॥ १५ ॥ पूषन्नेकर्षेयम
सूर्यप्राजापत्यव्यूहरश्मीन्त्समूहतेजोयत्तेरूपंकल्याणतमंतत्तेपश्यामि ॥ १६ ॥ योसावसौपुरुषस्सोहमस्मि
॥ १७ ॥ वायुरनिलममृतमथेदंभस्मांतꣳशरीरं ॥ १८ ॥ ॐक्रतोस्मरकृतꣳस्मर ॥ ॐक्रतोस्मरकृतꣳस्मर
॥ १९ ॥ अग्नेनयसुपथारायेअस्मान्विश्वानिदेववयुनानिविद्वान् । युयोध्यस्मज्जुहुराणमेनोभूयिष्ठांतेनमउ
क्तिंविधेम ॥ २० ॥ ईशावास्योपनिषत्संपूर्णा ॥ ॥ ॥
श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ हरिःॐ ॥ नित्यानित्यजगद्धा
त्रेनित्यायज्ञानमूर्तये ॥ पूर्णानंदायहरयेसर्वयज्ञभुजेनमः ॥ १ ॥ यस्माद्ब्रह्मेंद्ररुद्रादिदेवतानांश्रियोपिच । ज्ञा
नस्फूर्तिस्सदातस्मैहरयेगुरवेनमः ॥ २ ॥ स्वायंभुवोमनुरेतैर्मंत्रैर्भगवंतमाकूतिसूनुंयज्ञनामानंविष्णुंतुष्टा
व । स्वायंभुवस्स्वदौहित्रंविष्णुंयज्ञाभिधंमनुः । ईशावास्यादिभिर्मंत्रैस्तुष्टावाऽवहितात्मना । रक्षोभिरुग्रैस्सं



प्राप्तःखादितुंमोचितस्तदा । स्तोत्रंश्रुत्वैवयज्ञेनतान्हत्वाऽवध्यतांगतान् । प्रादाद्धिभगवांस्तेषामवध्यत्वंहरः 
प्रभुः । तैर्वध्यत्वंतथान्येषामतःकोन्योहरेःप्रभुरितिब्रह्मांडे । भागवतेचायमेवार्थउक्तः । ईशस्यावासयोग्य
मीशावास्यं । जगत्यांप्रकृतौ । तेनेशेनत्यक्तेनदत्तेनभुंजीथाः ॥ स्वतःप्रवृत्त्यशक्तत्वादीशावास्यमिदंजग
त् । प्रवृत्तयेप्रकृतिगंयस्मात्सप्रकृतीश्वरः । तदधीनप्रवृत्तित्वात्तदीयंसर्वमेवयत् । तद्दत्तेनैवभुंजीथाअतोना
न्यंप्रयाचयेदितिब्रह्मांडे ॥ १ ॥ अकुर्वतःकर्मनलिप्यतइतिनास्ति । अज्ञस्यकर्मलिप्येतकृष्णोपास्तिमकुर्व
तः । ज्ञानिनोपियतोह्रासआनंदस्यभवेद्ध्रुवं । अतोऽलेपेपिलेपस्स्यादतःकार्यैवसासदेतिनारदीये ॥२॥
सुष्ठुरमणविरुद्धत्वादसुराणांप्राप्यत्वाच्चासुर्याः । नचरमंत्यहोअसदुपासनयात्महनइत्युक्तत्वात् । महादुःखै
कहेतुत्वात्प्राप्यत्वादसुरैस्तथा । असुर्यानामतेलोकास्तान्यांतिविमुखाहरावितिवामने । येकेचेतिनियमउ
क्तः । नियमेनतमोयांतिसर्वेपिविमुखाहरावितिच ॥ ३ ॥ अनेजन्निर्भयत्वात्तदेकंप्राधान्यतस्तथा । सम्य
ग्ज्ञातुमशक्यत्वादगम्यंतत्सुरैरपि । स्वयंतुसर्वानगमत्पूर्वमेवस्वभावतः । अचिंत्यशक्तितश्चैवसर्वगत्वाच्चत 
तत्परं । द्रवतोत्येतिसंतिष्ठत्तस्मिन्कर्माण्यधान्मरुत् । मारुत्येवयतश्चेष्टासर्वातांहरयेर्पयेदितिब्रह्मांडे । ऋष

ज्ञाने॥४॥तदेजतिततएवएजत्यन्यत्। तत्स्वयंनेजति। ततोबिभेतिसर्वोपिनबिभेतिहरिःस्वयं। सर्वगत्वात्स
दूरेचबाह्येंतश्चसमीपगइतितत्त्वसंहितायां ॥ ५ ॥ सर्वगंपरमात्मानंसर्वंचपरमात्मनि। यःपश्येत्सभयाभा
वान्नात्मानंगोप्तुमिच्छतीतिसौकरायणश्रुतिः ॥ ६ ॥ यस्मिन्परमात्मनिसर्वभूतानिसपरमात्मैवतत्रसर्वभू
तेष्वभूत् । एवंसर्वभूतेष्वेकत्वेनपरमात्मानंविजानतःकोमोहः । यस्मिन्सर्वाणिभूतानिसआत्मासर्वभूत
गः । एवंसर्वत्रयोविष्णुंपश्येत्तस्यविजानतः । कोमोहःकोथवाशोकःसविष्णुंपर्यगाद्यतइतिपिप्पलादशा
खायां। पूर्वोक्तानुवादेनशोकमोहाभावोपिविजानतश्चात्रोच्यते । अभ्यासश्चसर्वगतत्वस्यतात्पर्यद्योतना
र्थः ॥७॥ शुक्रंतच्छोकराहित्यादव्रणंनित्यपूर्णतः। पावनत्वात्सदाशुद्धमकार्यलिंगवर्जनात्। स्थूलदेहस्य
राहित्यादस्नाविरमुदाहृतं। एवंभूतोपिसार्वज्ञात्कविरित्येवशब्द्यते। ब्रह्मादिसर्वमनसांप्रकृतेर्मनसोपिच।
ईशितृत्वान्मनीषीसपरिभूःसर्वतोवरः। सदाऽनन्याश्रयत्वाच्चस्वयंभूःपरिकीर्तितः । ससत्यंजगदेतादृङ्नि
त्यमेवप्रवाहतः । अनाद्यनंतकालेषुप्रवाहैकप्रकारतः । नियमेनैवससृजेभगवान्पुरुषोत्तमः । सज्ज्ञा
नानंदशीर्षोसौसज्ज्ञानानंदबाहुकः । सज्ज्ञानानंददेहश्चसज्ज्ञानानंदपादवान् । एवंभूतोमहाविष्णुर्य

ईशा० थार्थंजगदीदृशम् । अनाद्यनंतकालीनंससर्जात्मेच्छयाप्रभुरितिवाराहे ॥८॥ अन्यथोपासकायेतुतमोंधं भाष्यं
॥ ३ ॥ यांत्यसंशयं । ततोधिकमिवव्यक्तंयांतितेषामनिंदकाः। तस्माद्यथास्वरूपंतुनारायणमनामयं। अयथार्थस्य
निंदांच ॥९।१०॥ येविदुस्सहसज्जनाः। तेनिंदयाऽयथार्थस्यदुःखाज्ञानादिरूपिणः । दुःखाज्ञानादिसंती
र्णाःसुखज्ञानादिरूपिणः । यथार्थस्यपरिज्ञानात्सुखज्ञानादिरूपतां । यांति ॥ ११ ॥ एवंसृष्टिकर्तृत्वंनांगी
कुर्वंतियेहरेः । तेपियांतितमोघोरंतथासंहारकर्तृतां । नांगीकुर्वंतितेप्येवंतस्मात्सर्वगुणात्मकं । सर्वकर्तार
मीशेशंसर्वसंहारकारणं ॥ १२ । १३ ॥ योवेदसंहृतिज्ञानाद्देहबंधाद्विमुच्यते । सुखज्ञानादिकर्तृत्वज्ञाना
त्तद्व्यक्तिमाव्रजेत् । सर्वदोषविनिर्मुक्तंगुणरूपंजनार्दनं । जानीयान्नगुणानांचभागहानिंप्रकल्पयेत् । नमु
क्तानामपिहरेस्साम्यंविष्णोरभिन्नतां । नैवप्रचिंतयेत्तस्माद्ब्रह्मादेस्साम्यमेववा । मानुषादिविरिंचांतंतारत
म्यंविमुक्तिगं । ततोविष्णोःपरोत्कर्षंसम्यग्ज्ञात्वाविमुच्यतइतिकौर्मे ॥ १४ ॥ पात्रंहिरण्मयंसूर्यमंडलंसमु
दाहृतं। विष्णोस्सत्यस्यतेनैवसर्वदाऽपिहितंमुखं। तत्तुपूर्णत्वतःपूषाविष्णुर्दर्शयतिस्वयं। सत्यधर्मायभक्ता ॥६४०॥
य ॥१५॥ प्रधानज्ञानरूपतः। विष्णुरेकऋषिर्ज्ञेयोयमोनियमनाद्धरिः । सूर्यस्ससूरिगम्यत्वात्प्राजापत्यः

प्रजापतेः । विशेषेणैवगम्यत्वात् ॥ १६ ॥ अहंचासावहेयतः। अस्मिनित्यास्तितामानात्सर्वजीवेषुसंस्थितः।
स्वयंतुसर्वजीवेभ्योव्यतिरिक्तःपरोहरिः । सक्रतुर्ज्ञानरूपत्वादग्निरंगप्रणेतृतइतिब्रह्मांडे । सत्यंब्रह्महृदयेधार
यतीतिसत्यधर्मा । एकोऽसौशब्दःप्राणेस्थितइति ॥ १७ ॥ यस्मिन्नयंस्थितःसोप्यमृतःकिमुपरः । अःब्रह्मै
वनिलयनंयस्यवायोःसोऽनिलं । अतिरोहितविज्ञानाद्वायुरप्यमृतःस्मृतः । मुख्यामृतःस्वयंरामःपरमात्मा
सनातनइतिरामसंहितायां ॥ १८ ॥ भक्तानांस्मरणंविष्णोर्नित्यज्ञप्तिस्वरूपतः । अनुग्रहोन्मुखत्वंतुनै
वान्यत्कचिदिष्यतइतिब्रह्मतर्के ॥ १९ ॥ वयुनंज्ञानं । त्वद्दत्तयावयुनयेदमचष्टविश्वमितिवचनात् । जुहुरा
णंअस्मान् अल्पीकुर्वत् । युयोधिवियोजय । यदस्मान्कुरुतेऽत्यल्पांस्तदेनोऽस्मद्वियोजय । नयनोमोक्षवि
त्तायेत्यस्तौघज्ञंमनुस्वराडितिस्कांदे । युयुवियोगइतिधातुः । भक्तिज्ञानाभ्यांभूयिष्ठांनमउक्तिंविधेम॥२०॥
पूर्णशक्तिचिदानंदश्रीतेजःस्पष्टमूर्तये । ममाभ्यधिकमित्रायनमोनारायणायते ॥ १ ॥ इतिश्रीमदानंद
तीर्थभगवत्पादाचार्यविरचितमीशावास्योपनिषद्भाष्यंसमाप्तं ॥ ॥ ॥

१०८

॥ ईशावास्याभाष्यंसंपूर्ण ॥